DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

ADVANCED SANSKRIT
PART 1

# WEEK ONE

DIAMOND MOUNTAIN

# DIAMOND MOUNTAIN UNIVERSITY

Advanced Sanskrit, 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

## Fall Term, Class Schedule

**WEEK ONE: Thursday, Oct. 5, 2006 1:00 – 4:00 PM**

A. Review ASI Lesson 12 and take-home final from spring term
B. Introduction to third year Sanskrit
C. Overview of verbs: the present system (Whitney, #599-779)
D. Introduction to Arya Nagarjuna's मूलमध्यमककारिका

**HOMEWORK FOR WEEK ONE:**

For each of the verses below from Arya Nagarjuna's मूलमध्यमककारिका, provide a word by word English translation. In addition, identify for each word what grammatical part of speech it is. If it's a noun, identify its gender, case, and number (e.g., सद्भूतः, masculine, nominative, singular). If it's a verb, identify its verbal root, tense, voice, person and number (e.g. करोति, third person singular, present parasmaipadi, active, from the root कृ ).

<u>Hints:</u>

for the –ka suffix, consult Whitney, #1222

for the locatives in, e.g., verse 4, consult Whitney #303b-d

## कर्मकारकपरीक्षा नामाष्टमं प्रकरणं

सद्भूतः कारकः कर्म सद्भूतं न करोत्ययं ।

कारको नाप्यसद्भूतः कर्मासद्भूतमीहते ॥ १

सद्भूतस्य क्रिया नास्ति कर्म च स्यादकर्तृकम् ।

सद्भूतस्य क्रिया नास्ति कर्ता च स्यादकर्मकः ॥ २

करोति यद्यसद्भूतोऽसद्भूतं कर्म कारकः ।

अहेतुकं भवेत्कर्म कर्ता चाहेतुको भवेत् ॥ ३

हेतावसति कार्यं च कारणं च न विद्यते ।

तदभावे क्रिया कर्ता करणं च न विद्यते ॥ ४

धर्माधर्मौ न विद्येते क्रियादीनामसंभवे ।

धर्मे चासत्यधर्मे च फलं तज्जं न विद्यते ॥ ५

फलेऽसति न मोक्षाय न स्वर्गायोपपद्यते ।

मार्गः सर्वक्रियाणां च नैरर्थक्यं प्रसज्यते ॥ ६

कारकः सदसद्भूतः सदसत्कुरुते न तत् ।

परस्परविरुद्धं हि सच्चासच्चैकतः कुतः ॥ ७

सता च क्रियते नासन्नासता क्रियते च सत् ।

कर्त्रा सर्वे प्रसज्यन्ते दोषास्तत्र त एव हि ॥ ८

नासद्भूतं न सद्भूतः सदसद्भूतमेव वा ।

करोति कारकः कर्म पूर्वोक्तैरेव हेतुभिः ॥ ९

नासद्भूतोऽपि सद्भूतं सदसद्भूतमेव वा।

करोति कारकः कर्म पूर्वोक्तैरेव हेतुभिः॥ १०

करोति सदसद्भूतो न सन्नासच्च कारकः।

कर्म तत्तु विजानीयत्पूर्वोक्तैरेव हेतुभिह्॥ ११

प्रतीत्य कारकः कर्म तं प्रतीत्य च कारकम्।

कर्म प्रवर्तते नान्यत्पश्यामः सिद्धिकारणं॥ १२

एवं विद्यादुपादानं व्युत्सर्गादिति कर्मणः।

कर्तुश्च कर्मकर्तृभ्यां शेषान् भावान् विद्धावयेत्॥ १३